नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

No. of Printed Pages – **4**

# VU-87-Sahit. Shas.

## साहित्य – शास्त्रम्

**वरिष्ठ उपाध्याय परीक्षा, 2020**

**समय : 3¼ होराः**

**पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारित स्थाने नामांकः अनिवार्यतो लेखनीयः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

(5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि ।

1. सदृशयोः वाक्यार्थयोः ऐक्यारोपः कस्मिन् अलङ्कारे भवति ? **1**

2. अप्रस्तुतप्रशंसालङ्कारस्य लक्षणं लिखत । **1**

3. असंलक्ष्यक्रमव्यङ्ग्यध्वनौ केषां अन्तर्भावः भवति ? **1**

4. अविवक्षितवाच्यध्वनेः भेदयोर्नाम्नी लेख्ये । **1**

5. "मीलनाऽमीलनाद् द्विधा" इत्यत्र "अमीलनम्" पदस्य कोऽर्थः ? **1**

6. शब्दः प्रायः कं पुरस्कृत्य प्रवर्तते ? **1**

7. उत्तमानां सम्पदः किं विधाः भवन्ति ? **1**

8. प्रतिमानाटकस्य नायकः कः ? **1**

9. प्रतिमागृहे केषां प्रतिमाः स्थापिताः आसन् ? **1**

10. प्रतिमानाटके कति अङ्काः ? **1**

11. प्रौढां वृत्तिं विवेचयत । **2**

12. चन्द्रालोकानुसारं कति रीतयः ? नामोल्लेखं कुरुत । **2**

13. अपराङ्गगुणीभूतव्यङ्ग्यं सोदाहरणं निरूपयत । **2**

14. आचार्यजयदेवानुसारम् अभिधाभेदाः नामतो गणनीयाः । **2**

15. देवगिरिपर्वतस्य वैशिष्ट्यं स्वशब्देषु प्रतिपादनीयम् । **2**

16. "मेघदूतम्" नामकरणं विवेचयत । **2**

17. कैकेयीनन्दनः कः ? कैकेयी रामस्य कृते किम् इच्छति ? **2**

18. "न व्याघ्रं मृग शिशवः प्रधर्षयन्ति" इति सूक्तेः सप्रसङ्गो भावार्थो लेखनीयः । **1 + 1 = 2**

19. अधोलिखितालङ्कार युग्मेषु कयोश्चिद् **द्वयोः** परस्परं भेदः प्रदर्शनीयः । **2 + 2 = 4**

    (क) सहोक्तिः – समासोक्तिः

    (ख) वक्रोक्तिः – स्वभावोक्तिः

    (ग) दृष्टान्तः – प्रतिवस्तूपमा

20. अधोलिखितेषु द्वयोरुदाहरणयोः अलंकारौ परिचीय तयोः लक्षणोल्लेखपूर्वकं संगतिर्विधेया । **2 + 2 = 4**

(क) दीप्त्याग्निर्भाति भातीन्दुः कान्त्याभाति रवित्विषा ।

(ख) पश्य लाक्षा रसासिक्तं रक्तं त्वच्चरणद्वयम् ।

(ग) दृष्टं चेद्वदनं तस्याः किं पद्मेन किमिन्दुना ।

21. सारोपासाध्यवसानालक्षणायाः भेदान् सोदाहरणं विवेचयत । **4**

22. संलक्ष्यक्रमव्यङ्ग्यध्वनिः कतिविधः ? नामोल्लेखं कुरुत । **4**

23. वाच्यसिद्ध्यङ्गम् अगूढञ्च गुणीभूतव्यङ्ग्यं सोदाहरणं निरूपयत । **4**

24. महाकविकालिदासानुसारेण मेघदूतस्य प्रकृतिचित्रणं विवेचयत । **4**

25. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गो भावार्थो लेखनीयः । **1 + 3 = 4**

(क) तां चावश्यं दिवसगणनातत्परामेकपत्नी,
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् ।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां,
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि ।।

(ख) त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना,
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय,
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ।।

26. प्रतिमानाटकस्य तृतीयोऽङ्कस्य कथासारः लेखनीयः । **4**

27. अधोलिखितपद्ययोः कस्यचिदेकस्य छन्दः परिचीय तल्लक्षणं लेखनीयम् । लक्षणोदाहरणयोः संगतिश्च प्रदर्शनीया । **2 + 2 = 4**

(क) हा वत्स ! राम ! जगतां नयनाभिराम !
हा वत्स ! लक्ष्मण सलक्षणसर्वगात्र !
हा साध्वि ! मैथिलि ! पतिस्थितचित्तवृत्ते !
हा हा गताः किल वनं बत मे तनूजाः ।।

(ख) त्वया राज्यैषिण्या नृपतिरसुभिर्नैव गणितः,

सुतं ज्येष्ठं च त्वं व्रज वनमिति प्रेषितवती ।

न शीर्णं यद् दृष्ट्वा जनकतनयां वल्कलवती,

महो धात्रा सृष्टं भवति हृदयं वज्रकठिनम् ।।

28. वीररसस्य स्वरूपं विविच्य तदुदाहरणमपि विवेचनीयम् । **4 + 2 = 6**

**अथवा**

चन्द्रालोकानुसारं रसस्वरूपं निरूप्य भेदान् निर्दिशत ।

29. अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग–अन्वयसहिता व्याख्या करणीया । **1 + 1 + 1 + 3 = 6**

(क) धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः,

सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।

इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे,

कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।

(ख) तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा,

बाधेतोल्काक्षपितचमरी बालभारो दवाग्निः ।

अर्हस्येनं शमयितुमलं वारिधारा सहस्रै,

रापन्नार्तिप्रशमनफलाः सम्पदोह्युत्तमानाम् ।।

30. अधोलिखितश्लोकयोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग अन्वयसहिता व्याख्या करणीया – **1 + 1 + 1 + 3 = 6**

(क) आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते,

स्कन्धोच्चारणनम्यमानवदन प्रच्योतितितोये घटे ।

राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः,

स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भोः ! विस्मयः ।।

(ख) मुखमनुपमं त्वार्यास्याभं शशाङ्कमनोहरं,

मम पितृसमं पीनं वक्षः सुरारिशरक्षतम् ।

द्युतिपरिवृत्तस्तेजोराशिर्जगत्प्रियदर्शनो,

नरपतिरयं देवेन्द्रो वा स्वयं मधुसूदनः ।।

---